**SET – 4**

**Series : ONS/1**

**कोड नं.**
**Code No.** **49/1**

**रोल नं.**
**Roll No.** | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

## SANSKRIT (Elective)

*अवधि : होरात्रयम्* | *पूर्णाङ्का : **100***

*निर्धारित समय : **3** घंटे* | *अधिकतम अंक : **100***

*Time allowed : **3** hours* | *Maximum Marks : **100***

**निर्देशा :**

**निर्देश :**

**Instructions :**

*संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

*Answer all questions in Sanskrit, unless instructions are given otherwise.*

अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।

इस प्रश्न-पत्र में **चार** खण्ड हैं ।

*There are* ***four*** *sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन ) | **15 अङ्काः** |
| Section A | : | Unseen Reading Comprehension | |
| खण्डः ख | : | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | **15 अङ्काः** |
| Section B | : | Writing Skills in Sanskrit | |
| खण्डः ग | : | पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय) | **40 + 10 = 50 अङ्काः** |
| Section C | : | Reading Comprehension & Introduction to History of Sanskrit Literature | |
| खण्डः घ | : | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | **20 अङ्काः** |
| Section D | : | Metres and Figures of Speech | |

## खण्ड: क (Section A) **15 अङ्का:**

**अपठितांश – अवबोधनम्**

**अपठितांश – अवबोधन**

**Unseen Reading Comprehension**

1. अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following **two** passages and answer the given questions in Sanskrit.

**(क) प्रथम: अनुच्छेद:**

संसारस्य सर्वेषां प्राणिनां जीवने जलस्य महत्त्वम् अत्यधिकं वर्तते । जलेन एव मानवानां शरीरं किं वा अखिलानां जीवजन्तूनां, वृक्षादीनां चापि देह: जलेन एव पुष्यते । योऽपि जन: जलस्य प्रयोगं करोति स एतदपि जानातु यद् जलस्य संरक्षणं सदैव सर्वत्र च अनिवार्यम् । यदि कथमपि जलं न स्यात् तर्हि सर्वमेव जगद् विनष्टं भविष्यति ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) मानवानां शरीरं केन पुष्यते ?

(ii) 'भविष्यति' इति क्रियाया: कर्तृपदं किम् ?

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

यदि जलं न स्यात् तर्हि किं भविष्यति ?

(स) यथानिर्देशम् उत्तरत । **½ × 4 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) अत्र 'शरीरम्' अस्य क: पर्याय: ?

(ii) 'प्राणिनाम्' अस्य विशेषणं किम् ?

(iii) 'स:' इति सर्वनामपदं कस्य कृते प्रयुक्तम् ?

(iv) 'महत्त्वम्' अस्य कृते का क्रिया अत्र प्रयुक्ता ?

(ख) **द्वितीय: अनुच्छेद:**

सेवाया: रूपाणि विविधानि सन्ति । मुख्यत एषा द्विविधा भवति । दैहिकी आर्थिकी च । दैहिकी सा भवति यथा जन: स्वकीयेन पाणिपादेन सेव्यस्य जनस्य सेवां करोति । यथा आर्त्तजनस्य अंगादीनां पीडनं विलेपनादिकं वा । तस्य अस्वच्छानि वस्त्राणि प्रक्षाल्य मधुरया गिरा तस्मै आश्वासनम् । चिकित्सका: कल्पदा वा एतादृशीं सेवां विशेषत: कर्त्तुं शक्नुवन्ति । परम् अद्यत्वे चिकित्साया: क्षेत्रम् अर्थलोलुपं सञ्जातम् । चिकित्सकस्य शुश्रूषया कुत्रचिद् धनार्जनं भवति, कुत्रचिन्मैत्री भवति अपरत्र च पुण्यप्राप्ति: यश: प्राप्ति: वा प्राप्यते । यदि च कीदृशमपि फलं न लभ्यते तर्हि कर्माभ्यासरूपं ज्ञानं तु सञ्जायत एव । एवं केनापि रूपेण चिकित्सा निष्फला न जायते ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । **1 × 2 = 2**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) सेवाया रूपाणि कीदृशानि सन्ति ?

(ii) चिकित्सा कीदृशी न जायते ?

(ब) पूर्णवाक्येन उत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

शुश्रूषया किं किं प्राप्यते ?

(स) यथानिर्देशम् उत्तरत । **1 × 4 = 4**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'ज्ञानम्' अस्य विशेषणं किम् ?

(ii) 'जायते' अस्य कर्तृपदं किम् ?

(iii) 'शुश्रूषा' अस्य क: पर्याय: ?

(iv) 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं **संस्कृतेन** लिखत । **2**

इस अनुच्छेद के लिए उपयुक्त शीर्षक **संस्कृत** में लिखिए ।

Write a suitable title for this passage in **Sanskrit**.

## खण्डः ख (Section B) **15 अङ्काः**

### संस्कृतेन रचनात्मकलेखनम्

### संस्कृत में रचनात्मक लेखन

### Writing Skills in Sanskrit

2. मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुनः लिखत । **1 × 10 = 10**

मञ्जूषा से उचित संकेत लेकर निम्नलिखित कथा को पूर्णकर पुनः लिखिए ।

Complete and rewrite the following story, with the help of the words given in the box below.

**कथा :**

वनवाससमये ________ (i) पाण्डवाः सहदेवं जलमानेतुं ________ (ii) प्रति प्रैषयन् । तत्र यक्षः तमकथयत् – "पूर्वं मम प्रश्नान् उत्तर, ततः ________ (iii) पिब ।" परं सहदेवः तमवमत्य जलमपिबत् । जलं पीत्वैव स ________ (iv) सन् अपतत् । एतादृशी घटनैव क्रमशः नकुलेन ________ (v) भीमेन च सहाभवत् । अन्ते च यक्षः ________ (vi) अपि तथैव उवाच । युधिष्ठिरस्तु यक्षेण ________ (vii) सर्वान् प्रश्नान् ________ (viii) । यक्षस्तु प्रसन्नः सन् ________ (ix) सर्वान् अनुजान् पुनर्जीवितान् ________ (x) ।

**मञ्जूषा**

| |
|---|
| अकरोत्, अर्जुनेन, उदतरत्, मूर्च्छितः, तृषार्त्ताः, युधिष्ठिरम्, कथितान्, तस्य, तडागम्, जलम् । |

3. मञ्जूषातः पदानि चित्वा 'प्रधानमन्त्री' इति शीर्षकमधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत । **1 × 5 = 5**

मञ्जूषा से पद चुनकर 'प्रधानमन्त्री' इस शीर्षक पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit on "Prime Minister" with the help of the words given in the box.

**मञ्जूषा**

| |
|---|
| भारतस्य, अभिधानम्, राष्ट्रसेवकः, सततम्, उद्यमी, देशम्, प्रजाम्, रक्षति, बोधयति, विदेशिनाम्, स्वकीयाम्, संस्कृतिम्, आर्थिकनिवेशम्, भ्रष्टाचारम्, दूरीकरोति । |

## खण्ड : ग (Section C) 40 + 10 = 50 अङ्का:

### पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचय: च

### पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय

### Reading Comprehension & Introduction to History of Sanskrit Literature

4. अधोलिखितं पद्यं, गद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित पद्य, गद्यांश तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following verse, prose and drama passages and answer the given questions in Sanskrit.

**(क) पद्यम्**

"यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुष: ।
आत्मश्रेयसि तावदेव विदुषा कार्य: प्रयत्नो महान्,
प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यम: कीदृश: ।।"

**प्रश्ना:**

(अ) एकपदेनोत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) 'शरीरम्' अस्य क: पर्याय: ?

(ii) विदुषा क: कार्य: ?

(ब) पूर्णवाक्येनोत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

कस्मिन् प्रोद्दीप्ते किं प्रत्युद्यम: कीदृश: ?

(स) यथानिर्देशम् उत्तरत । **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'यावत्' अस्य विलोमपदं किम् ?

(ii) 'इन्द्रियशक्ति:' अस्य पदस्य कृते का क्रिया प्रयुक्ता ?

**(ख) गद्यांश** :

"एवं चतुर्णां परस्परं विवादो लग्न: । ततो ब्राह्मणो राजसमीपमागत्य चतुर्णां विवादवृत्तान्तमकथयत् । राजापि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ । इति कथां कथयित्वा पुत्तलिका राजानमवदत्, 'भो राजन् ! त्वय्येवंविधमौदार्यं विद्यते चेदस्मिन् सिंहासने समुपविश ।"

**प्रश्ना**:

(अ) एकपदेनोत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) राजा ब्राह्मणाय कानि ददौ ?

(ii) राजानं का अवदत् ?

(ब) पूर्णवाक्येनोत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

पुत्तलिका राजानं किम् अवदत् ?

(स) यथानिर्देशम् उत्तरत । **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'गत्वा' अस्य विलोमपदं किम् ?

(ii) 'कलह:' अस्य क: पर्याय: ?

**(ग) नाट्यांश**:

"अरुन्धती – अतिजवेन दूरमतिक्रान्त: स चपल: कथं दृश्यते ? (प्रविश्य)

बटव: – पश्यतु कुमारस्तावदाश्चर्यम् ।

लव: – दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्व: ।

बटव: – कथं ज्ञायते ?

लव: – ननु मूर्खा: ! पठितमेव युष्माभिरपि तत्काण्डम् । किं न पश्यथ ? प्रत्येकं शतसंख्या: कवचिनो दण्डिनो निषङ्गिणश्च रक्षितार: । यदि च विप्रत्ययस्तत्पृच्छत ।"

**प्रश्ना**:

(अ) एकपदेनोत्तरत । **½ × 2 = 1**

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) क: दूरमतिक्रान्त: ?

(ii) अश्व: कीदृश: ?

(ब) पूर्णवाक्येनोत्तरत । **2**

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

रक्षितार: कीदृशा: ?

(स) यथानिर्देशमुत्तरत । **1 × 2 = 2**

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'पश्यतु' अस्या: क्रियाया: कर्तृपदं किम् ?

(ii) कै: काण्डं पठितम् ?

5. शब्दार्थान् मेलयित्वा पुन: लिखत । **½ × 4 = 2**

शब्दों का अर्थों से मिलान कर पुन: लिखिए ।

Match the words with their meanings and rewrite the same.

| | **शब्दा:** | | **अर्था:** |
|---|---|---|---|
| (अ) | सुहृद: | (i) | बुद्धिमता |
| (ब) | विदुषा | (ii) | मित्रस्य |
| (स) | उत्कर्ष: | (iii) | सफलताम् |
| (द) | संसिद्धिम् | (iv) | उन्नति: |

6. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । **1 × 4 = 4**

रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए ।

Frame questions on the basis of underlined words.

(i) <u>नाथे</u> कुतस्त्वय्यशुभं प्रजानाम् ।

(ii) यस्त्<u>वर्थिनां</u> पूरयति ।

(iii) ब्राह्मणसमूहो <u>दक्षिणया</u> तोषित: ।

(iv) <u>रत्नानि</u> अर्पयित्वा गुणकथनमकरोत् ।

7. अधोलिखित**भावार्थयो**: रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत । **½ × 12 = 6**

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks in the following **two** explanations with the help of the words given in the box.

(अ) "असुर्या नाम ते लोका अन्धेन तमसाऽऽवृता: ।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना: ।।"

**भावार्थ**:

अस्मिन् ________ (i) ये प्रदेशा: ________ (ii) प्रकाशने ________ (iii) सन्ति, तान् ________ (iv) ते जीवा: प्राप्नुवन्ति ये स्वयम् ________ (v) प्राणान् ________ (vi) ।

(ब) "यदि नो सन्ति सन्त्येव केयमद्य बिभीषिका ।
किमुक्तैरेभिरधुना तां पताकां हरामि व: ।।"

**भावार्थ**:

कामं ते ________ (i) सन्ति ________ (ii) न ________ (iii) । ________ (iv) अत्र आवश्यकता नास्ति, अहं ________ (v) एतं ________ (vi) अधुनैव नीत्वा गच्छामि ।

**मञ्जूषा**

| |
|---|
| भटा:, युष्माकम्, सूर्यस्य, संसारे, लोकान्, आत्मन:, यदि वा, ध्वजम्, सन्ति, कथनस्य, रहिता:, हरन्ति । |

8. अधोलिखितयो: **श्लोकयो**: अन्वययो: रिक्तस्थानपूर्तिं कुरुत । **1½ + 1 ½ = 3**

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks in the following prose-order renderings in the **two** verses.

(अ) "अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ।।"

**अन्वय**:

विद्यया अन्यत् एव आहु: ________ (i) अन्यत् एव आहु: । ________ (ii) इति शुश्रुम, ये न: ________ (iii) विचचक्षिरे ।।

(ब) "नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत् ।
विश्वस्मिन्नधुनान्य: कुलव्रतं पालयिष्यति क: ।।"

**अन्वय**:

हे हंस ! त्वम् एव ________ (i) आलस्यं तनुषे ________ (ii) विश्वस्मिन् अधुना क: ________ (iii) पालयिष्यति ।

9. यथानिर्देशम् उत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत । ½ × **4 = 2**

कर्ता एवं क्रियापद चुनिए ।

Select the subject and the verb.

(i) एष मे मन: हरति ।

(ii) अकर्मण: ते शरीरयात्रापि न प्रसिद्ध्येत् ।

(ब) विशेषणपदं चिनुत । **1 × 2 = 2**

विशेषण पद चुनिए ।

Select the adjective.

(i) द्वितीयरत्नेन भोजनादिकममृततुल्यमुत्पद्यते ।

(ii) सप्त ग्रहा मेखलावत् परिभ्रमन्ति ।

(स) अधोलिखितपङ्क्त्यो: रेखांकित-सर्वनामपदे काभ्यां प्रयुक्ते ? **1 × 2 = 2**

निम्नलिखित पंक्तियों में रेखांकित-सर्वनामपद किसके लिए प्रयुक्त हैं ?

In the following lines for whom are the underlined pronouns used ?

(i) त्वं बहु मन्यन्ते <u>यो</u>ऽहर्निशं स्तौति ।

(ii) वाण्येका समलङ्करोति पुरुषं <u>या</u> संस्कृता धार्यते ।

(द) अधोलिखितपंक्तिभ्यां 'कमलम्' तथा 'कथयति' इति पदयो: समानार्थके पदे चित्वा लिखत । **1 × 2 = 2**

निम्नलिखित पंक्तियों में 'कमल' तथा 'कहता है' पदों के समानार्थक पद चुनकर लिखिए ।

Select and write the synonyms of the words 'lotus' and 'says' from the following lines.

(i) पश्यामि ते मुखपुण्डरीकम् ।

(ii) गुह्यमाख्याति पृच्छति ।

(य) क: कं कथयति ? ½ × **4 = 2**

कौन किसे कह रहा है ?

Who is saying to whom ?

(i) स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ।

(ii) जात ! अस्ति ते माता, स्मरसि वा तातम् ?

10. (अ) अधोलिखितलेखकानां कस्यापि **एकस्य** काव्यस्य नाम लिखत । **1 × 5 = 5**

निम्नलिखित लेखकों की किसी **एक** रचना का नाम लिखिए ।

Write the name of any **one** work each of the following poets.

हृषीकेशभट्टाचार्य:, कालिदास:, बाण:, मथुरानाथशास्त्री, व्यास:

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत । **1 × 5 = 5**

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए ।

Write the names of the authors of the following works.

उत्तररामचरितम्, पाषाणीकन्या, सिंहासनद्वात्रिंशिका, शिशुपालवधम्, नीतिशतकम् ।

## खण्ड: घ (Section D) **20 अङ्का:**

### छन्दोऽलङ्कारा:

### छन्द एवं अलङ्कार

### Metres and Figures of Speech

11. (अ) प्रश्नान् उत्तरत । **1 × 2 = 2**

प्रश्नों के उत्तर दीजिए ।

Answer the questions.

(i) 'शक्ति:' अत्र 'श' इति वर्ण: लघु: गुरु: वा ?

(ii) 'रगणस्य स्वरूपं लिखत ।'

(ब) अधोलिखितपरिभाषा: पूरयत । **1 × 4 = 4**

निम्नलिखित परिभाषाओं को पूर्ण कीजिए ।

Complete the following definitions.

(i) ननमययुतेयं ________ लोकै: ।

(ii) उक्ता ________ तभजाजगौ ग: ।

(iii) रसै रुद्रैश्छिन्ना ________ शिखरिणी ।

(iv) ________ जतजास्ततो गौ ।

(स) अधोलिखितपङ्क्त्यो: किं किं छन्द: ? **1 × 2 = 2**

निम्नलिखित पंक्तियों में कौन-कौन सा छन्द है ?

What is the metre in the following lines ?

(i) केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला: ।

(ii) पापान्निवारयति योजयते हिताय ।

(द) **एकस्य** छन्दस: उदाहरणं लिखत । **1 × 2 = 2**

**एक** छन्द का उदाहरण लिखिए ।

Write the example of any **one** of the following metres.

शिखरिणी, इन्द्रवज्रा ।

12. (अ) कस्यचि**देकस्य** शब्दालंकारस्य सोदाहरणं लक्षणं लिखत । **3**

किसी **एक** शब्दालंकार का उदाहरण सहित लक्षण लिखिए ।

Write the definition and example of any **one** of the following figures of speech.

अनुप्रासः, श्लेषः ।

(ब) केवल**मेक**स्यार्थालङ्कारस्य सोदाहरणं लक्षणं लिखत । **3**

किसी **एक** अर्थालङ्कार का उदाहरण सहित लक्षण लिखिए ।

Define and illustrate any **one** of the following figures of speech.

रूपकम्, उत्प्रेक्षा ।

(स) अधोदत्तपङ्क्त्योः अलंकारं निर्दिशत । **$1 \times 2 = 2$**

निम्नलिखित पंक्तियों में अलङ्कार निर्देश कीजिए ।

Indicate the figures of speech in the following lines.

(i) रमते न मरालस्य मानसं मानसं विना ।

(ii) वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ।

(द) अधोलिखितपरिभाषा**द्वयं** पूरयत । **$1 \times 2 = 2$**

निम्नलिखित **दोनों** परिभाषाओं को पूर्ण कीजिए ।

Complete the following **two** definitions of the figures of speech.

(i) रूपकं रूपितारोपो ………… ।

(ii) श्लिष्टैः पदैरनेकार्थाभिधाने ………… ।